# Aarati - Morning Glory 6:30 a.m.



## ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे *



### श्रीदेवीजीको आरती

नमो देव्यै महादेव्यै शिवायै सततं नमः |
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ||१||

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः |
ज्योत्स्नायै चेन्दुरुपिण्यै सुखायै सततं नमः ||२||

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः |
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ||३||

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै |
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ||४||

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः |
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ||५||

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||६||

या देवी सर्वभूतेषु चेतनेत्यभिधीयते |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||७||

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||८||

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||९||

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१०||

या देवी सर्वभूतेषु च्छायारूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||११||

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१२||

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१३||

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१४||

या देवी सर्वभूतेषु जातिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१५||

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१६||

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१७||

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१८||

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||१९||

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२०||

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२१||

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२२||

या देवी सर्वभूतेषु दयारूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२३||

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२४||

या देवी सर्वभूतेषु मातृरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२५||

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२६||

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या |
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ||२७||

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२८||

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः |
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ||२९||

स्तुता सुरैः पूर्वमभीष्टसंश्रया
त्था सुरेन्द्रेण दिनेषु सेविता |
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ||३०||

या साम्प्रतं चोद्धतदैत्यतापितै
रस्माभिरीशा च सुरैर्नमस्यते|
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः||३१|| (2x)

**Yogashakti Mission**
27/a Chola Apts., 2nd Floor, 8th Str., Gopalpuram, Chennai 600 086 Tel: 442 811-2243

*Sing one minute before Aaratri

# Aarati - Evening Glory 6:30 p.m.



## ॐ ऐं ह्रीं क्लीं चामुण्डायै बिच्चे *



**श्रीदेवीजीको आरती**

**जगजननी जय ! जय ! माँ ! जगजननी जय जय ‼**
**भयहारिणि, भवतारिणि, भयहारिणि, भवतारिणि,**
**भवभामिनि जय जय ‼ ॐ जगजननी जय ! जय !**

तू ही सत्-चित्-सुखमय शुद्ध ब्रह्मरूपा ।
माँ शुद्ध ब्रह्मरूपा ।
सत्य सनातन सुन्दर, सत्य सनातन सुन्दर,
पर-शिव सुर-भूपा ॥ ॐ जगजननी जय ! जय ॥१॥

आदि अनादि अनामय अविचल अविनाशी ।
माँ अविचल अविनाशी ।
अमल अनन्त अगोचर, अमल अनन्त अगोचर,
अज आनंदराशी ॥ ॐ जगजननी जय ! जय ॥२॥

अविकारी, अघहारी, अकल, कलाधारी ।
माँ अकल, कलाधारी ।
कर्त्ता विधि, भर्त्ता हरि, कर्त्ता विधि, भर्त्ता हरि,
हर संहारकारी ॥ ॐ जगजननी जय ! जय ॥३॥

तू विधिवधू, रमा, तू उमा, महामाया ।
माँ तू उमा, महामाया ।
मूल प्रकृति विद्या तू, मूल प्रकृति विद्या तू,
तू जननी, जाया ॥ ॐ जगजननी जय ! जय ॥४॥

राम, कृष्ण तू, सीता, ब्रजरानी राधा ।
माँ सीता ब्रजरानी राधा ।
तू वाञ्छाकल्पद्रुम, तू वाञ्छाकल्पद्रुम,
हारिणि सब बाधा ॥ ॐ जगजननी जय ! जय ॥५॥

दश विद्या, नव दुर्गा, नानाशस्त्रकरा ।
माँ नानाशस्त्रकरा ।
अष्टमातृका, योगिनि, अष्टमातृका, योगिनि,
नव-नव रूप धरा ॥ ॐ जगजननी जय ! जय ॥६॥

तू परधामनिवासिनि, महाविलासिनि तू ।
माँ महाविलासिनि तू ।
तू ही श्मशानविहारिणि, तू ही श्मशानविहारिणि,
ताण्डवलासिनि तू ॥ ॐ जगजननी जय ! जय ॥७॥

सुर-मुनि-मोहिनि सौम्या, तू शोभाऽऽधारा ।
माँ तू शोभाऽऽधारा ।
विवसन विकट-स्वरूपा, विवसन विकट-स्वरूपा,
प्रलयमयी धारा ॥ ॐ जगजननी जय ! जय ॥८॥

तू ही स्नेहसुधामयि, तू अति गरल मना ।
माँ तू अति गरल मना ।
रत्नविभूषित तू ही, रत्नविभूषित तू ही,
तू ही अस्थि-तना ॥ ॐ जगजननी जय ! जय ॥९॥

मूलाधारनिवासिनि, इह-पर-सिद्धिप्रदे ।
माँ इह-पर-सिद्धिप्रदे ।
कालातीता काली, कालातीता काली,
कमला तू वरदे ॥ ॐ जगजननी जय ! जय ॥१०॥

शक्ति शक्तिधर तू ही नित्य अभेदमयी ।
माँ नित्य अभेदमयी ।
भेदप्रदर्शिनि वाणी, भेदप्रदर्शिनि वाणी,
विमले ! वेदत्रयी ॥ ॐ जगजननी जय ! जय ॥११॥

हम अति दीन दुखी माँ ! विपत-जाल घेरे ।
माँ विपत-जाल घेरे ।
हैं कपूत अति कपटी, हैं कपूत अति कपटी,
पर बालक तेरे ॥ ॐ जगजननी जय ! जय ॥१२॥

निज स्वभाववश जननी ! दया दृष्टि कीजै ।
माँ दयादृष्टि कीजै ।
करुणा कर करुणामयि ! करुणा कर करुणामयि !
चरण शरण दीजै ॥ ॐ जगजननी जय ! जय ॥१३॥

जगजननी जय ! जय ! माँ ! जगजननी जय जय ‼
भयहारिणि, भवतारिणि, भयहारिणि, भवतारिणि,
भवभामिनि जय जय ‼ ॐ जगजननी जय ! जय !


**Yogashakti Mission**
27/a Chola Apts., 2nd Floor, 8th Str., Gopalpuram, Chennai 600 086 Tel: 442 811-2243


*Sing one minute before Aaratri

## Universal Prayer

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥

## Ganesh Prayer

गजाननं भूतगणादिसेवितं
कपित्थ जम्बूफल चारुभक्षणम् ।
उमासुतं शोकविनाशकारक
नमामि विघ्नेश्वर पादपंकजम् ॥

सजयति सिन्धूर वदनो देवो
यत्पादपंकज स्मरणम् ।
वासरमणिरिव तमसां
राशिन्नाशयति विघ्नानाम् ॥ (2 x)

## Prayer to the Nine (Planets)

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनि राहु केतवः
सर्वे ग्रहाः शान्तिकरा भवन्तु ॥ (2 x)

## Krishna Prayers

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ (3 x)

## Prayer to Lord Shiva

कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम् ।
सदावसन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि ॥ (2 x)

## Prayer to Vishnu

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानिगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ (2 x)

## Prayer to Raam

नीलाम्बुज श्यामलकोमलांगं सीतासमारोपित
वामभागम् ।
पाणौ महासायक चारुचापं
नमामि रामं रघुवंशनाथम् ॥ (2 x)

## Prayer to Hanumaan

मनोजवं मारुततुल्यवेगं जितेन्द्रियं
बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथ मुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥ (2 x)

## Prayer to Guru

गुरुब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरुवे नमः ॥

अज्ञान तिमिरान्धस्य ज्ञानांजन शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरुवे नमः ॥

नित्यं शुद्धं निराभासं निराकारं निरंजनम् ।
नित्यबोधं चिदानन्दं गुरु ब्रह्मा नमाम्यहम् ॥

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥ (3 x)

## Prayer to Light

शुभं भवतु कल्याणमारोग्यं पुष्टिवर्धनम् ।
आत्मतत्व प्रबोधाय दीपज्योतिर्नमोऽस्तु ते ॥ (2 x)

## Prayer of Shiva Mandir

जटाटवी गलज्जल प्रवाह पावित-स्थले
गलेऽवलम्ब्य लम्बितां भुजङ्ग तुङ्ग मालिकाम् ।
डमड् डमड् डमड् डमन् निनाद-वड्ड-मर्वयं
चकार चण्ड ताण्डवं तनोतु नः शिवः शिवम् ॥

जटा कटाह सम्भ्रम भ्रमन् निलिम्प निर्झरी-
विलोल वीचि वल्लरी विराज मान मूर्द्धनि ।
धगद्-धगद्-धग-ज्जवल-ल्ललाट पट्ट पावके
किशोर चन्द्र शेखरे रतिः प्रतिक्षणं मम ॥

Chant 3 times do parikrama going around 3 times.

**Yogashakti Mission**
27/a Chola Apts., 2nd Floor, 8th Str., Gopalpuram, Chennai 600 086 Tel: 442 811-2243